॥अथगणहोमप्रयोगप्रारंभः॥पत्र१४॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

॥श्रीगणेशायनमः॥ ॥अथगणहोमः॥पूर्वाङ्गेरक्ष्याग्निंप्रतिष्ठाप्यप्राणानायम्य
तिथ्यादिसंकीर्त्यआधानानधिकारसंपादकसमस्तपापक्षयार्थंश्रौतस्मार्तनित्य
नयोग्यतासिध्यर्थंचगणहोमंकरिष्ये।आघारांतंतंत्रंसंकल्प्यअत्रप्रधानंसवितारंच
रुद्रश्चेणाग्न्यादयश्चतत्तन्मंत्रोक्तदेवताश्चरुद्रव्येणशेषेणस्विष्टकृतमित्यादिआघा
रांतंकृत्वाचरुंसाविज्याहुत्वाचरोःप्रभूतमाज्यमानीयमेक्षणेनावदायजुहुयात्।अग्ने
नयेतिषडर्चस्यसूक्तस्यविश्वेदेवाऋषयः।अग्निर्देवतात्रिष्टुप्छंदः।चरुहोमेविनि
योगः।अग्नेनयसुपथाराये ॥अस्मान्विश्वानिदेववयुनानिविद्वान्॥युयोध्यस्मज्जुहु १

राणमेनोभूयिष्ठांतेनमउक्तिंविधेमस्वाहा।अग्नयइदं॥प्रवःशुक्रायभानवेभरध्वं
हव्यंमतिंचाग्नयेसुपूतं॥योदैव्यानिमानुषाजनूंष्यंतर्विश्वानिविद्मनाजिगाति॥स्वाहा॥
अग्नयइदं॥अच्छागिरोमतयोदेवयंतीरग्निंयंतिद्रविणंभिक्षमाणाः॥समिद्धाग्निंसु
प्रतीकंसचेन्द्रंहव्यवाहमरतिंमानुषाणांस्वाहा।अग्नयइदं॥अग्नेत्वमस्मद्युयो
ध्यमीवाअनग्निराभरभंतकृष्टीः॥पुनरस्मभ्यंसुविताययंधिवक्षोविश्वेभिरग्नेभि
र्यजत्रस्वाहा॥अग्नयइदं॥अग्नेतंपारयानव्योअस्मान्त्स्वस्तिभिरतिदुर्गाणिविश्वा॥
पूश्चपृथ्वीबहुलानउर्वीभवातोकायतनायशंयोःस्वाहा॥अग्नयइदं॥प्रकोरवो

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

मनुनावुच्यमानादेवद्रीचींनयथदेवयंतः॥दक्षिणावाड्वाजिनीप्राच्येतिहविर्भरंत्यग्न
येघृतावतीस्वाहा॥अग्नयइदं०॥६॥सहस्रशीर्षंत्र्यष्टादशर्चस्यसूक्तस्यप्रजापतिर्ऋषिः॥
पुरुषोनारायणोदेवता॥पंचदशानुष्टुभःतिस्रस्त्रिष्टुभः॥चरुहोमेविनियोगः॥सहस्रशी
र्षापुरुषःसहस्राक्षःसहस्रपात्॥सभूमिंविश्वतोवृत्वात्यतिष्ठद्दशांगुलंस्वाहा॥
पुरुषायनारायणायेदं०॥पुरुषएवेदंसर्वंयद्भूतंयच्चभव्यं॥उतामृतत्वस्येशानः॥यद
न्नेनातिरोहतिस्वाहा॥पुरुषा०एतावानस्यमहिमा॥अतोज्यायांश्चपूरुषः॥पादोस्य
विश्वाभूतानि॥त्रिपादस्यामृतंदिविस्वाहा॥पुरुषा०॥त्रिपादूर्ध्वउदैत्पुरुषःपादोस्ये २

हाभवत्पुनः॥ततोविष्वङ्व्यक्रामत्साशनानशनेअभिस्वाहा॥पुरुषा०॥तस्माद्विरा
डजायत॥विराजोअधिपूरुषः॥सजातोअत्यरिच्यत॥पश्चाद्भूमिमथोपुरःस्वाहा॥पुरु०॥
यत्पुरुषेणहविषा॥देवायज्ञमतन्वत॥वसंतोअस्यासीदाज्यं॥ग्रीष्मइध्मःशरद्धविःस्वा
हा॥पुरुषा०॥सप्तास्यासन्परिधयः॥त्रिःसप्तसमिधःकृताः॥देवायद्यज्ञंतन्वानाः॥अब
ध्नन्पुरुषंपशुंस्वाहा॥पुरुषा०॥तंयज्ञंबर्हिषिप्रौक्षन्॥पुरुषंजातमग्रतः॥तेनदेवाअ
यजंत॥साध्याऋषयश्चयेस्वाहा॥पुरुषा०॥तस्माद्यज्ञात्सर्वहुतः॥संभृतंपृषदाज्यं॥
पशूंस्तांश्चक्रेवायव्यान्॥आरण्यान्ग्राम्याश्चये स्वाहा॥पुरुषा०॥तस्माद्यज्ञात्सर्व

हुतः।ऋचः सामानि जज्ञिरे॥छंदाꣳसि जज्ञिरे तस्मात्।यजुस्तस्मादजायत।स्वाहा॥पुरु०॥
तस्मादश्वा अजायंत।ये के चोभयादतः॥गावो ह जज्ञिरे तस्मात्।तस्माज्जाता अजावयः
स्वाहा॥पुरुषा०॥यत्पुरुषं व्यदधुः।कतिधा व्यकल्पयन्॥मुखं किमस्यकौ बाहू।काविरू
पादावुच्येते।स्वाहा॥पुरु०॥ब्राह्मणोऽस्य मुखमासीत्।बाहू राजन्यः कृतः॥उरू तदस्य यद्वै
श्यः।पद्भ्याꣳ शूद्रो अजायत।स्वाहा॥पुरुषा०॥चंद्रमा मनसो जातः।चक्षोः सूर्यो अजाय
त।मुखादिंद्रश्चाग्निश्च।प्राणाद्वायुरजायत।स्वाहा॥पुरुषा०॥नाभ्या आसीदंतरिक्षं।
शीर्ष्णो द्यौः समवर्तत॥पद्भ्यां भूमिर्दिशः श्रोत्रात्।तथा लोकाꣳ अकल्पयन्।स्वाहा॥पु०॥ ३

वेदाहमेतं पुरुषं महांतं।आदित्यवर्णं तमसस्तु पारे॥सर्वाणि रूपाणि विचित्य धीरः।
नामानि कृत्वाभिवदन्यदास्ते।स्वाहा॥पुरुषा०॥धाता पुरस्ताद्यमुदाजहार।शक्रः प्रविद्वा
न्प्रदिशश्चतस्रः॥तमेवं विद्वानमृत इह भवति।नान्यः पंथा अयनाय विद्यते।स्वाहा॥पु
रु०॥यज्ञेन यज्ञमयजंत देवाः।तानि धर्माणि प्रथमान्यासन्॥ते ह नाकं महिमानः सचं
ते।यत्र पूर्वे साध्याः संति देवाः।स्वाहा॥पुरुषायनारायणायेदं नमम॥१८॥अग्नेर्मन्व
इति द्वाविंशार्चस्य सूक्तस्य विश्वेदेवा ऋषयः।लिंगोक्ता देवताः।सप्तउपरिष्टाज्ज्यो
तिषः।अष्टमी पंक्तिः।पंचउपरिष्टाज्ज्योतिषः।चतुर्दशी पथ्याबृहती।सप्तदशी

गायत्रीतनएकात्रिष्टुप्पुनर्विंशाविंशाचोपरिष्टाज्ज्योतिषोऽन्त्येहेत्रिष्टुभोचरुहोमे
विनियोगः।अग्नेर्मन्वेप्रथमस्यप्रचेतसोयंपांचजन्यंबृहवंःसमिंधते॥विश्वस्यांविशि
प्रविविशिवाꣳसमीमहेसनोमुंचत्वꣳहसःस्वाहा।अग्नयेꣳहोमुचइदंनमम॥यस्येदंप्रा
णंनिमिषच्चदेजतियस्येजानंजनेमानंचकेवलं॥स्तोमेष्विग्नोथिनोजोहवीमिसनोमुं
चत्वꣳहसःस्वाहा।अग्नयेꣳहोमुचइदं॥इंद्रस्यमन्येप्रथमस्यप्रचेतसोऽवत्रघःस्तोमा
उपमामुपागुः॥योदाशुषःसुकृतोहवमुपगंतासनोमुंचत्वꣳहसःस्वाहा।इंद्रायाꣳहो
मुचइदं॥यꣳसंग्रामंनयतिसंवृषायुधेयःपृष्टानिमꣳसूजतित्रयाणि॥स्तोमेष्विंनाथि ४

नोजोहवीमिसनोमुंचत्वꣳहसःस्वाहा।इंद्रायाꣳहोमुचइदं॥मन्वेवांमित्रावरुणातस्यवि
त्तꣳसत्योजसाऽरेणायंनुदेथे॥याराजानꣳसरथंयाथऊग्तानोमुंचतमागसःस्वाहा।मि
त्रावरुणाभ्यामागोमुग्भ्यामिदं॥योवाꣳरथेऋजुरश्मिःसत्यधर्मामिथुश्चरंतमुपयाति
दूषयन्॥स्तोमेमिमित्रावरुणानाथितोजोहवीमितोनोमुंचतमागसःस्वाहा।मित्रावरु
णाभ्यामागोमुग्भ्यामिदं॥वायोःसवितुर्विदथानिमन्महेयावात्मन्वद्बिभृतोयोवुरक्षं
तः॥योविश्वस्यपरिभूर्बभूवतुस्तोनोमुंचतमागसःस्वाहा।वायुसवितृभ्यामागोमु
ग्भ्यामिदं॥उपश्रेष्ठानआशिषोदेवयोर्धर्मꣳश्चिरन्॥स्तोमेमिरायुꣳसवितारंना

थि॒तो जो॑हवी॒मि॒तो नो॑मुंचत॒मार्ग॑सः॒ स्वाहा॑॥ वा॒यु॒स॒वि॒त॒भ्यामा॒गो॒मु॒ग्भ्या॒मि॒दं॑॥ र॒
थी॒तमो॑रथी॒ नामं॑ह॒तु॒तये॒ शु॒भं॒गमि॑ष्ठो॒ मु॒यमे॑भि॒र॒ध्वैः॥ यया॒र्वां॑दे॒वो॒दे॒वेषु॑नि॒शि॒तु॒मो
ज॒स्तो॒नो॒मुं॒च॒त॒मार्ग॑सः॒ स्वाहा॑॥ अ॒श्वि॒भ्या॒मा॒गो॒मु॒ग्भ्या॒मि॒दं॑॥ य॒दया॑तं॒वह॑तुः॒ सूर्या॑या
स्त्रि॒च॒क्रेण॑स॒ꣳसद॑मि॒च्छ॒मा॒नो॑॥ स्तो॒मि॒दे॒वा॒व॒श्वि॒नो॑ना॒थि॒तो॒जो॑हवी॒मि॒तो॑नो॑मुंचत॒
मार्ग॑सः॒ स्वाहा॑॥ अ॒श्वि॒भ्या॒मा॒गो॒मु॒ग्भ्या॒मि॒दं॑॥ म॒रु॒तां॑मन्वे॒ अधि॑नो॒ ब्रु॒वं॒तु॒ प्रे॒मा॒वा॒चं॒वि
श्वा॑मवंतु॒ विश्वे॑॥ आ॒श्रु॒न्धे॒ सु॒य॒मा॒नू॒तये॒ ते॑नो॑मुंचं॒त्वेन॑सः॒ स्वाहा॑॥ मरु॑द्भ्य॒एनो॑मु॒ग्भ्य॒इ॒
दं॑॥ ति॒ग्मसा॑र्युधंवी॒डि॒त॒ꣳसद॑स्वद्भि॒व्य॒ꣳश॒र्द्धः प॒ते॑नासु॒न्नि॒ह्लु॒॥ स्तो॒मि॒दे॒वा॒न्म॒रु॒तो॑ना ५

थि॒तो जो॑हवी॒मि॒ते॑नो॑मुंचं॒त्वेन॑सः॒ स्वाहा॑॥ मरु॑द्भ्य॒एनो॑मु॒ग्भ्य॒इ॒दं॑॥ दे॒वा॒नां॑मन्वे॒ अधि॑
नो॒ ब्रु॒वं॒तु॒ प्रे॒मा॒वा॒चं॒वि॒श्वा॒मवं॑तु॒ विश्वे॑॥ आ॒श्रु॒न्धे॒ सु॒य॒मा॒नू॒तये॒ ते॑नो॑मुंचं॒त्वेन॑सः॒ स्वाहा॑॥
विश्वे॑भ्यो॒ दे॒वे॒भ्य॒एनो॑मु॒ग्भ्य॒इ॒दं॑॥ य॒दि॒दं॑मा॒भि॒शो॒चं॒ति॒ पो॒रु॒षे॒ये॒ण॒ दै॒व्येन॑॥ स्तो॒मि॒ विश्वा॑न्दे॒
वान्नो॑थि॒तो॒जो॑हवी॒मि॒ते॑नो॑मुंचं॒त्वेन॑सः॒ स्वाहा॑॥ विश्वे॑भ्यो॒ दे॒वे॒भ्य॒एनो॑मु॒ग्भ्य॒इ॒दं॑॥ अ॒नु॒नो॑
या॒नु॒म॒ति॒र्य॒ज्ञं॒दे॒वे॒षु॒म॒न्य॒ता॑॥ अ॒ग्निश्च॑ह॒व्य॒वा॒ह॒नो॒ भ॒व॒तां॒दा॒शु॒षे॒म॒यः॒ स्वाहा॑॥ अ॒नु॒म॒त्या
इ॒दं॑॥ अ॒न्वि॒दं॒नु॒म॒ते॒ त्वं म॒न्या॒सै॒ शं॒च॒नः॒ रु॒धि॒॥ ऋ॒ते॒ द॒क्षा॒य॒नो॒ हि॒षु॒ प्र॒ण॒ आ॒र्यं॒॑षि॒ता॒रि॒
षः॒ स्वाहा॑॥ अ॒नु॒म॒त्या इ॒दं॑॥ वै॒श्वा॒न॒रो॒न॒वु॒त्या॒ प्र॒या॒तु॒प॒रा॒व॒तः॑॥ अ॒ग्नि॒रु॒क्थे॒न॒ वा॒ह॒सा॒ स्वा

हो॥अग्नयेवैश्वानरायेदं॥पृष्टोदिविपृष्टोअग्निःपृथिव्यांपृष्टोविश्वाओषधीरावि॒वेश॥
वैश्वानरःसहसापृष्टोअग्निःसनोदिवासरिषःपातुनक्तꣳस्वाहा॥अग्नयेवैश्वानरा
येदं॥येअग्रेथेनामभितेभिरोजोभिर्येप्रतिष्ठेअभवतांवसूनां॥स्तोमिद्यावापृथिवी
नाथि॒तोजोहवीमि॒तेनोमुंच॒तमꣳहसः स्वाहा॥द्यावापृथिवीभ्यामꣳहोमुग्भ्यामिदं॥
उर्वꣳरोदसीवरिवःकृणोतंक्षेत्रस्यपत्नीअधिनोब्रूयातं॥स्तोमिद्यावापृथिवीनाथि॒तोजो
हवीमि॒तेनोमुंच॒तमꣳहसः स्वाहा॥द्यावापृथिवीभ्यामꣳहोमुग्भ्यामिदं॥यत्तेव॒यंपुरु
षत्रायविष्ठाविद्वाꣳसश्चकृमाकच्चनागः॥कृधीस्वस्माꣳअदितेरनागा॒व्येनाꣳसिशिश्र ६

थोविष्वग्ग्नेस्वाहा॥अग्नयइदं॥यथाहूतहꣳसवोगो॒र्यैचित्सदिषि॒ताममुंचताय
जत्राः॥एवात्वमस्मत्समुंचाव्यꣳहःप्रातर्यन्नेप्रतरांनआयुःस्वाहा॥अग्नयइदं॥२२॥
यावामिंद्रेतिचतुर्णांयजुषांविश्वेदेवाऋषयः॥इंद्रावरुणौदेवता॥चरुहोमेवि॥यावांमिं
द्रावरुणायत॒व्यात॒नूस्तयेममꣳहसोमुंच॒तꣳस्वाहा॥इंद्रावरुणाभ्यामꣳहोमुग्भ्यामिदं॥
यावांमिंद्रावरुणासह॒स्यात॒नूस्तये॒ तꣳस्वाहा॥इंद्रावरुणाभ्यामꣳहोमुग्भ्यामिदं॥
यावांमिंद्रावरुणारक्ष॒स्यात॒नूस्तये॒तꣳस्वाहा॥इंद्रावरु॥यावांमिंद्रावरुणातेज॒स्या
त॒नूस्तये॒॥इंद्रावरु॥योवामिंद्रावरुणेयज्ञस्यष्टानांयजुषांविश्वेदेवाऋषयः॥इंद्रावरुणौ

॥४॥

देवता॥चरुहोमेवि०॥योवांमिंद्रावरुणावुग्नोस्त्रामुस्तंवांमे॒तेनावंयजे॒स्वाहा॥इंद्रावरुण
योरग्नोस्त्रामायेदं०॥योवांमिंद्रावरुणाद्विपात्सुप॒शुषुस्त्रामु॰यजे॒स्वाहा॥इंद्रावरुणयोद्वि
पात्सुपशुषुस्त्रामा०॥योवांमिंद्रावरुणाचतु॒ष्पात्सुप॒शुषुस्त्रा॰यजे॒स्वाहा॥इंद्रावरुणयोश्च
तुष्पात्सुपशुषुस्त्रा०॥योवांमिंद्रावरुणागो॒ष्ठेस्त्रामु॰यजे॒स्वाहा॥इंद्रावरुणयोगोष्ठेस्त्रामा०॥
योवांमिंद्रावरुणागृ॒हेषुस्त्रामु॰यजे॒स्वाहा॥इंद्रावरुणयोर्गृहेषुस्त्रामा०॥योवांमिंद्रावरु
णाप्सुस्त्रामु॰यजे॒स्वाहा॥इंद्रावरुणयोरप्सुस्त्रामायेदं०॥योवांमिंद्रावरु॒णोषधी॒षुस्त्रामु॰
यजे॒स्वाहा॥ इंद्रावरुणयोरोषधीषुस्त्रामायेदं०॥योवांमिंद्रावरुणा॒वनु॒स्पति॒षुस्त्रामु॰॥ ७

यजे॒स्वाहा॥इंद्रावरुणयोर्वनस्पतिषुस्त्रामायेदं०॥८॥पवमानःसुवर्जनइतिसप्तदशर्चस्या
नुवाकस्यसोमऋषिः॥लिंगोक्तदेवताः॥द्वेगायत्र्यौतृतीयानुष्टुप्द्वेगायत्र्यौद्वेत्रिष्टु
भौ॰अष्टमीगायत्री॰अष्टावनुष्टुभःसप्तदशीत्रिष्टुप्॥चरुहोमेविनि०॥पवमानः॒सुवर्जनः॒
प॒वित्रे॑ण॒विच॑र्षणिः॥य॒ःपोता॒सपु॑नातु॒मास्वाहा॥पवमानायसुवर्जनायविचर्षणयेपात्रा
येदं०॥पुनं॑तुमादेवज॒नाःपुनं॑तुमनवोधि॒या॥पुनं॑तुविश्व॒श्रायवः॒स्वाहा॥देवजनमनुवि
श्वायुभ्यइदं०॥जात॑वेदःप॒वित्रे॑वस॒वित्रे॑ण॒पुना॑हिमा॥शु॒क्रेण॑देवदी॒द्यद॒ग्नेक्रत्वा॑क॒तुर॑
नुस्वाहा॥जातवेदसेग्नयइदं०॥यत्ते॑प॒वित्र॒मर्चि॒ष्यग्ने॑वित॑तंत॒र॒॥ब्रह्म॒तेन॑पुनीम

हेस्वाहा॥अग्नयेब्रह्मणइदं०॥उभाभ्यांदेवसवितःपवित्रेणसूर्यस्यरश्मिभिः॥
स्वाहा॥देवायसवित्रेब्रह्मणइदं०॥वैश्वदेवीपुनतीदेव्यागात्यस्यैबह्वीस्तनुवोवीतपृष्ठाः॥
तयामदंतःसधमाद्येषुवयꣳस्यामपतयोरयीणाꣳस्वाहा॥वैश्वदेव्येपुनत्याइदं०॥वैश्वानरो
रश्मिभिर्मापुनातुवातःप्राणेनेषिरोमयोभूः॥द्यावापृथिवीपयसापयोभिर्ऋतावरीयज्ञिये
मापुनीतांꣳस्वाहा॥वैश्वानरवातेषिरद्यावापृथिव्यतावरीभ्यइदं०॥बृहद्भिःसवितस्तृभि
र्वर्षिष्ठैर्देवममनिभिः॥अग्नेदक्षैःपुनाहिमास्वाहा॥सवित्रेप्रसवइदं०॥येनदेवाअपुनतयेन
नापोदिव्यंकशः॥तेनदिव्येनब्रह्मणेदंब्रह्मपुनीमहेस्वाहा॥दिव्यायब्रह्मणइदंनमम॥ ८

यःपावमानीरध्येत्यृषिभिःसंभृतꣳरसं॥सर्वꣳसपूतमश्नातिस्वदितंमातरिश्वे
नास्वाहा॥पावमानीभ्यइदं०॥पावमानीर्योअध्येत्यृषिभिःसंभृतꣳरसं॥तस्मैसरस्व
तीदुहेक्षीरꣳसर्पिर्मधूदकꣳस्वाहा॥पावमानीभ्यइदं०॥पावमानीःस्वस्त्ययनीःसुदु
घाहिपयस्वतीः॥ऋषिभिःसंभृतोरसोब्राह्मणेष्वमृतꣳहितꣳस्वाहा॥पावमानीभ्य
इदं०॥पावमानीर्दिशंतुनऊर्मंलोकमथोअमुं॥कामान्त्समर्धयंतुनोदेवीर्दैवीःसमा
भृताःस्वाहा॥पावमानीभ्यइदं०॥पावमानीःस्वस्त्ययनीःसुदुघाहिघृतश्चुतः॥ऋ
षिभिःसंभृतोरसोब्राह्मणेष्वमृतꣳहितꣳस्वाहा॥पावमानीभ्यइदं०॥येनदेवाःप

वित्रेणात्मानंपुनतेसदा॥तेनंसहस्त्रधारेणपावमान्यः पुनंतुमास्वाहा॥पावमानीभ्य
इदं०॥प्राजापत्यंपवित्रंशतोद्योमंहिरण्मयं॥तेनंब्रह्मविदोवयंपूतंब्रह्मपुनीमहेस्वा
हा॥ब्रह्मणइदं०॥इंदुंःसुनीतीसुहमापुनातुसोमंःस्वस्त्यावरुणंःसमीच्या॥युमोराजाप्र
मृणाभिःपुनातुमाजातवेदामोर्जयंत्यापुनातुस्वाहा॥इंद्रायसुनीत्यासहितायसोमा
यस्वस्त्यासहितायवरुणायसमीच्यासहिताययमायराज्ञेप्रमृणाभिःसहितायजा
तवेदमुर्जयंत्यासहितायेदं०॥१७॥यद्देवेतिविंशत्यृचस्यानुवाकस्यविश्वेदेवाऋष
यःलिंगोक्तदेवताः॥आद्यानुष्टुप्द्वितीयाजगतीतृतीयामहापंक्तीचतुर्थ्यनुष्टुप्पंच

म्यतिशक्करीषष्ठीत्रिष्टुप्सप्तम्यतिजगत्यष्टमीजगतीनवमीबृहतीद्वेशक्वर्यौद्वादशी
त्रिष्टुप्त्रयोदश्यष्टिः चतुर्दश्यनुष्टुप्पंचदश्यनुष्टुप्षोडशीगायत्रीतिस्त्रस्त्रिष्टुभः
विंशत्यनुष्टुप्चरहोमेविनियोगः॥यद्देवादेवहेडनंदेवांसश्चकृमावयं॥आदित्यास्तस्मा
न्मामुंचतुर्तस्युर्तेनुमा मुतस्वाहा॥देवेभ्यआदित्येभ्यइदं०॥देवोजीवनकाम्यायद्वावान्ते
तमूदिम॥अग्निर्मातस्मादेनसोगार्हपत्यःप्रमुंचतुदुरितायानिंवकृमकुरोतुमामनेनसः
स्वाहा॥अग्नयेगार्हपत्यायेदं०॥कृतेनद्यावापृथिवीकृतेनत्वंसरस्वति॥कृतान्मामुं
चतांहसोयदन्यकृतमारिमस्वाहा॥द्यावापृथिवीभ्यांसरस्वत्याइदं०॥सुजातशंसा

दुतवाजामिशꣳसाज्यायꣳसःशꣳसादुतवाकनीयसः॥अनाज्ञातंदेवकृतंयदेनस्तस्मा
त्वमुस्माज्जातवेदोमुमुग्ध्िस्वाहा॥जातवेदसइदं॥यद्वाचायन्मनसाबाहुभ्यामूरुभ्या
मष्ठीवद्भ्यांꣳशिश्नैर्यदनृतंचकृमावयं॥अग्निर्मातस्मा॰नसꣳस्वाहा॥अग्नयेगार्हप॰॥
यद्धस्ताभ्यांचकृकिल्बिषाण्यक्षाणांवृजुमुपजिघ्रमानः॥दूरेपश्याचराधुभ्रञ्चुतान्य
सुरसावनुदन्तामृणानिस्वाहा॥दूरेपश्याराधुभ्रञ्चामप्नरोभ्यामिदं॥अदीव्यन्नृणंय
दहंचकारयद्वादास्यꣳसंजगाराजनेभ्यः॥अग्निर्मातस्मादेनसो॰नसꣳस्वाहा॥अग्नये
गार्हपत्यायेदं॥यन्मयिमातागर्भेसत्येनश्चकारयत्सिता॥अग्निर्मातस्मा॰॥अग्नये

गार्ह॰॥यद्वापितेषमातरंपितरंपुत्रःप्रमुदितोधयन्॥अहिꣳसितोपितरोमयातत्तदग्नि
अनृणोभवामिस्वाहा॥अग्नयेअनृणायेदं॥यदंतरिक्षंपृथिवीमुतद्यांयन्मातरंपित
रंवाजिहिꣳसिम॥अग्निर्मातस्मादेनसो॰नसꣳस्वाहा॥अग्नयेगार्हप॰॥यदाशसानिरा
साययस्याशसायदेनश्चकृमानूतंनंयत्पुरुणं॥अग्निर्मातस्मा॰॥अग्नयेगार्ह॰॥अतिक्रा
मामिदुरितंयदेनोजहामिरिप्रंपरमेसधस्थे॥यत्रयंतिसुकृतोनापिदुष्कृतस्तमारोहा
मिसुकृतानुलोकꣳस्वाहा॥अग्नयइदं॥त्रितेदेवाअमृजतेनदेनस्त्रितएतन्मनुष्येषु
मामृजे॥ततोमायदिकिंचिरानरोग्निर्मातस्मा॰॥अग्नयेगार्ह॰॥द्विजाताअप्नुना

ताया॒जाता॒ओष॑धीभ्यः॥ अथो॑या॒ अ॒ग्निजा॒ आपस्ता॑न॒शुं॑धंतुशुंधनीः॒स्वाहा॑॥ अ॒द्भ्यः
शुं॑धनीभ्यइ॒दं॑॥ यदापा॑न॒क्तंदु॒रि॒तंच॒रामि॒यद्वा॒दिवा॒नक्त॑ंनं॒यसु॒राण॑॥ हि॒र॒ण्य॒व॒र्णास्त
तु॒उ॒स्वु॒नी॒त॒न॒ऊ॒स्वाहा॑॥ अ॒द्भ्यो॒हि॒र॒ण्य॒व॒र्णा॒भ्य॒इ॒दं॑॥ इ॒मंमे॑वरु॒ण॑॥ व॒रु॒णा॒ये॒दं॑॥ त॒त्त्वा॒या॒मि॑॥
व॒रु॒णा॒ये॒दं॑॥ त्वंनो॑अग्ने॒॥ अ॒ग्नी॒व॒रु॒णा॒भ्या॒मि॒दं॑॥ स॒त्वंनो॑अग्ने॒अ॒ग्नी॒व॒रु॒णा॒भ्या॒मि॒दं॑॥
त्वमग्नेअ॒या॑॥ अ॒ग्न॒येअ॒यस॒इ॒दं॑॥ २॥ वै॒श्वा॒न॒र॒इत्य॒ष्टानां॑वि॒श्वेदे॒वाऋ॒॑षयः॑॥ वै॒श्वान
रोदे॒व॒ता॒॥ द्वे॒गा॒य॒त्र्यौ॒ऽनु॒ष्टु॒भा॒॥ तृ॒तीया॒ज॒ग॒ती॒॥ ति॒स्र॒स्त्रि॒ष्टु॒भः॒॥ स॒प्त॒मी॒ज॒ग॒ती॒॥ अ॒ष्टमी॒त्रि॒ष्टु॒प्च
रु॒हो॒मे॑॥ वै॒श्वा॒न॒रो॒नऊ॒त्याप्र॑यातु॒परा॒व॑तः॑॥ अ॒ग्निरु॒क्थेन॒वाह॑सा॒स्वाहा॑॥ अ॒ग्न॒ये ११

वै॒श्वा॒न॒रा॒येदं॑॥ ऋ॒तावा॑नंवैश्वान॒र॒मृ॒त॒स्यज्योति॑षस्पति॑॥ अ॒ज॒स्रंघ॒र्ममी॑महे॒स्वा
हा॑॥ अ॒ग्न॒येवै॑श्व॒न॑॥ वै॒श्वा॒न॒र॒स्यद॑ꣳसना॒भ्यो॒बृ॒ह॒द॒रि॒णा॒दे॒कः॒स्व॒प॒स्यया॑कृ॒विः॑॥ उ॒भा
पि॒तरा॑मह॒यन्न॒जाय॒ताग्निर्द्यावा॑पृथि॒वी॒भू॒रि॒रि॒त॒सा॒स्वाहा॑॥ अ॒ग्न॒येवै॑॥ पृ॒ष्टोदि॒वि
पृ॒ष्टोअ॒ग्निः॒पृ॑थि॒व्यां॑पृ॒ष्टोवि॒श्वाओ॑ष॒धी॒रावि॑वेश॥ वै॒श्वा॒न॒रः॒सह॑सापृ॒ष्टोअ॒ग्निः॒स
नो॒दि॒वा॒स॒रि॒षः॒पा॒तु॒न॒क्तꣳस्वाहा॑॥ अ॒ग्न॒येवै॑॥ जा॒तोय॒दे॒ने॒भुव॑ना॒व्य॑ख्यः॒पशुं॑नगो॒पा
इ॒र्यः॒परि॑ज्मा॑॥ वै॒श्वा॒न॒र॒ब्रह्म॑णेविंदगातुं॒यूय॑ंपात॒स्वस्ति॑भिः॒सदा॑नः॒स्वाहा॑॥ अ॒ग्न॒येवै॑॥
त्वमग्नेशो॒चिषा॒शो॒शु॒चा॒न॒आरोद॑सी॒अ॒पृ॒णा॒जा॒य॒मा॒नः॑॥ त्वदे॒वाꣳअ॒भि॒श॒स्ते॒रमु

चोवैश्वानरजातवेदोमहित्वास्वाहा॥अग्नयेवै॥अस्माकमग्नेमघवत्सुधारयानामि
क्षत्रमजरꣳसुवीर्यं॥वयंजयेमशतिनꣳसहस्रिणंवैश्वानरवाजमग्नेतवोतिभिःस्वा
हा॥अग्नयेवै॥वैश्वानरस्यसुमतौस्यामराजाहिकंभुवनानामभिश्रीः॥इतोजातोवि
श्वमिदं विचष्टेवैश्वानरोयतते सूर्येणस्वाहा॥अग्नयेवै॥८॥व्याहृतिभिरुपहो
मंहुत्वास्विष्टकृदादिहोमशेषंसमाप्यअथोदकपात्रमादायनैर्ऋतीदिङ्मागलागोम
येनोपलिप्यउपविश्यउदपात्रंपुरोनिधायतत्रप्रतिबिंबितमात्मानमवेक्षमाणो
वक्ष्यमाणान्मंत्रान्जपेत्॥ ॥सिꣳहेमेमन्युर्व्याघ्रेमंतरामयोवृकेमेक्षुदश्वेमेघसिर्ध १२

न्वनिमेपिपासाराजगृहेमेशनयाश्मनिमेतंद्विर्दंभेमेरिशःशल्यकेमेऽक्षीरश्वत्थे
मेवेपथुःकूर्मेमेंगरोगोबस्तेमेपसर्याप्रियेमेमृत्युर्भ्रात्व्येमेपाप्मासपत्नेमेनिर्ऋति
र्दुष्कीर्तौमेव्यृद्धिःपरस्वतिमेऽसमृद्धिःरक्ष्केमेऽआर्तिर्गवयेमेऽआध्यंगोरेमेबाधिर्यमृ
क्षेमेशोकोगोधायांमेस्वेदोजरायांमेहिमःकृष्णशकुनौमेभीरुताकशेमेपापोगंधउ
लूकेमेश्वभ्यःशल्कोकेमईर्ष्यामर्कटेमेदुर्ऋद्धिःकुललेमेमंस्योललेमेप्रज्ञाउष्ट्रेमेत्व
ष्ट्रार्ष्यमेपत्रमोव्यांमेऽआव्यंकोशेमेगंधःकुमार्यांमेलंकारःसूकरेकूदथुःपृदाकुनि
मेस्वप्नोजगरेमेदुःस्वप्नोविघुतिमेस्मयशोलोभायांमेकूदःशरमेमेपाप्माऽअल

गण॰ १३

क्ष्मीस्त्रीषुमेनृतमजासुमेकर्कशोव्रात्येमईत्याशूद्रेमेस्तेयंवैश्येमेकार्मुकंराजन्य
बंधुनिमेज्ञानंनेषादेमब्रह्महत्याकुलिंगेमेस्ववधूरुललेमेविलासउद्दिणिमेवमतिः
किंपुरुषेमेरोदोद्वीपिनिमेनिष्कृतिर्हस्तिनिमेकिलासःशुनिमेदुरिष्टंस्रावण्येषुमेम्ले
छोविदेहे षुमेशीपथोमहावर्षेषुमेग्लोर्मृजवस्तुमेतस्माद्दुष्कृतोमेकाशिकेक्ष्वाकु
षुमेपित्तंकलिंगेषुमेमेध्यमश्वतर्यांमेप्रजस्तापुंश्चल्यांमेदुश्चरित्रमारण्यनिमेदंत
रागोमक्षिकायांमेश्वल्कत्राःशुकेमेहरिमामयूरेमेनल्यावृषेमेजराचार्षेमेपापवादो
ष्णुमेश्रमोब्रह्मोक्षेमेकिल्बिषमपेहिपाप्मन्पुनरपनाशिनोभवानःपाप्मन्त्सुकृतस्य १३

गण॰ १४

लोकेपाप्मन्धेह्यविहतोयोनःपाप्मन्नजहातितमुत्राजहिमोवयमन्यत्रास्मिन्निविश
ताःसहस्राक्षोअमर्त्योयोनोद्वेष्टिसरिष्यतोयमुद्विष्मस्तमुजहि॥अथैताअपोंजलि
नोपसंहरति॥सुमित्रान्आपओषधयःसंतु॥नेर्क्रत्यांप्रक्षिपति।दुर्मित्रास्तस्मैभूया
सुर्योस्मान्द्वेष्टियंचवयंद्विष्मः॥पात्रंपरास्यापस्पृष्ट्वानवेक्षमाणआगत्यहस्तपादान्प्र
क्षाल्याचम्यहिरण्यादिसंकल्यकर्मेश्वरार्पणंकुर्यात्॥एवमेवत्रिषवणंकुर्यात्॥॥
॥इतिगणहोमप्रयोगःसमाप्तः॥ ॥शके१७०४शुभकृन्नामसंवत्सरेआषाढकृष्ण२
द्वितीयायांसमाप्तेथालिग्रोपभट्टस्येदंपुस्तकं॥ ॥संवत१८३९प्रमादीसंवत्सरः॥ ॥ १४

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

No. 63

॥इतिगणहोमःसमाप्तः॥पत्र१४॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY